# Kailasashailaprakaravarnanam 3

# કૈલાસશૈલપ્રાકારવર્ણનમ્ ૩

## Document Information

Text title : Kailasashailaprakaravarnanam 3

File name : kailAsashailaprAkAravarNanam3.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 16 - panchabrahmaprAkAravarNanam ||

Latest update : January 6, 2024

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 6, 2024

*sanskritdocuments.org*

# કૈલાસશૈલપ્રાકારવર્ણનમ્ ૩

(કૈલાસશૈલે પઞ્ચબ્રહ્મપ્રાકારવર્ણનમ્ ૩)

સ્કન્દ ઉવાચ-
શ્રુણુધ્વં બ્રહ્મવિચ્છ્રેષ્ઠા (બ્રહ્મવિષ્ણવાદ્યા)
મુનયશ્ચ ગણોત્તમાઃ (તપોધનાઃ) ।
જૈગીષવ્ય મહાપ્રાજ્ઞ શ‍ૃણુધ્વમમલાઃ કથાઃ ॥ ૭॥

શમ્ભોર્વિચિત્રવિભવાશ્શ્રોત્રપાવામલાઃ કથાઃ ।
ક્ષીરોદધિમહાખાતપ્રાકારોઽસ્તિતદન્તરઃ ॥ ૮॥

(તત્પુરુષ)
ઉદ્ભૂતચન્દ્રકિરણૈસ્તરઙ્ગચૈવ ભાસુરઃ ।
રજતોચ્છ્રાયશ‍ૃઙ્ગાગ્રો મહાવૃષભલાઞ્છિતઃ ॥ ૯॥

નાનાગોપુરરત્નૌઘપ્રભાભાસિતદિઙ્મુખઃ ।
સ્ફટિકૈઃ કૃતદેવેશવરસુન્દરવિગ્રહૈઃ ॥ ૧૦॥

શોભિતો ગોપુરાણાઞ્ચ સમૂહૈઃ પરિશોભિતઃ ।
તત્પૂર્વદેશે દેવસ્ય તત્પૂર્વસ્ય મનોહરમ્ ॥ ૧૧॥

ગોપુરં સૌધસુભગં સ્તમ્ભવિદ્રુમપુત્રિકમ્ ।
મણિકૢપ્તાચ્છવલભીનિર્યત્પારાવતીગણમ્ ॥ ૧૨॥

તત્ર સિંહાસનવરં નવરત્નવિચિત્રિતમ્ ।
તત્ર સ્થિતં ગણૈર્દેવૈશ્શૂલતેજોલસત્કરૈઃ ॥ ૧૩॥

કપર્દધૃતચન્દ્રાર્કૈર્ભસિતામલલોચનૈઃ ।
ત્રિપુણ્ડ્રવિલસદ્ભાલૈર્વિલસદ્ભાલલોચનૈઃ ॥ ૧૪॥

રત્નાન્તરિતરુદ્રાક્ષમાલાલળિતકન્ધરૈઃ ।
નીરદોદ્યત્પ્રભાભાસ્વન્નીરજોપમકન્ધરૈઃ ॥ ૧૫॥

વાતાશનકૃતોચ્છ્વાસચલદ્ધારમનોહરૈઃ ।
મહાડમરુનાદેન ભીષિતાખિલદિક્તટૈઃ ॥ ૧૬॥

ફણામણિકૃતાપારનૂપુરાઙ્ગદકઙ્કણૈઃ ।
રણન્મઞ્જીરવલયૈસ્સિંહસંહનનૈર્ગણૈઃ ॥ ૧૭॥

પુણ્ડરીકાજિનભવત્કૃષ્ણરેખાકટીતટૈઃ ।
મહેભચર્મવસનૈર્બાલાતપસમપ્રભૈઃ ॥ ૧૮॥

ગણેન્દ્રૈર્વારણેન્દ્રાભૈઃ કરિશુણ્ડોરુબાહુભિઃ ।
અહિમન્યુભિરુત્કૃષ્ટૈઃ કોટિભિર્ગણપૈર્વૃતઃ ॥ ૧૯॥

પૃષત્કકરનિસ્તૃંશવાણાસનધરૈર્વરૈઃ ।
પૂર્વતો ભાતિતત્પૂર્ષશ્ચેન્દુકુન્દસમપ્રભઃ ॥ ૨૦॥

જટામુકુટસંશોભિરાજરાજકલાધરઃ ।
ભસ્માભ્યક્તસ્ત્રિપુણ્ડ્રાઙ્કચતુર્બાહુરુદારધીઃ ॥ ૨૧॥

ત્રિણેત્રો નીલકણ્ઠશ્ચ બાલસૂર્યાયુતપ્રભઃ ।
તત્પૂરુષં મહાલિઙ્ગં સમ્પૂજ્ય વરિવસ્યયા ॥ ૨૨॥

સમર્ચયતિ વિપ્રેન્દ્ર બિલ્વપત્રૈશ્શિવાર્ચકઃ ।
સ્તુવતે સાવધાનેન તલ્લિઙ્ગં રત્નધામગમ્ ॥ ૨૩॥

- -

તત્પુરુષઃ -
સ્વચ્છછત્રાભિરામં છવિજિતરજતં છન્દસાઙ્ગીતતુષ્ટમ્
સ્વચ્છન્દાયાં નિરિચ્છોદધિનિજમહિગોચ્છન્નમચ્છાચ્છદેહમ્ ।
છદ્મેભારિછદાચ્છછદમજમજરં પિઞ્છતાપિઞ્છગુચ્છ-
છાયાસછાયવામાઙ્ગમમદધિષણે સદ્વિપચ્છેદનેચ્છમ્ ॥ ૨૪॥

આશીવિષાઙ્ગદ સદૈવ મહેશ કાશીવાસીકૃતાનન્દવન પ્રસીદ ।
સંસારવારાશિતરે પુરારે કીનાશનાશ ભયમાશુ વિનાશયાય ॥ ૨૫॥

- -

સ્કન્દઃ -
ઇત્થં સ્તૌતિ સદાકાલં પુરુષઃ પુરુષેશ્વરમ્ ।
(ઇત્થં સ્તૌતિ સદાકાલં તત્પૂરુષઃ પરમેશ્વરમ્) ।
(અઘોર)

તત્રાસ્તેગણપાધીશઃપ્રાચીન્તામ્પાલયન્દિશમ્ ॥ ૨૬॥

ક્ષારોદધિપરીવૃત્તઃ કાલાયસવિનિર્મિતઃ ।
પ્રાકારો રાજતે વિત્ર દક્ષિણે ગોપુરૈર્વૃતઃ ॥ ૨૭॥

લવણામ્ભોધિકલ્લોલઘર્ઘરાનિલઘોષિતઃ ।
તત્ર નાના મહાભોગફણારત્નાલયો મહાન્ ॥ ૨૮॥

સૌધાન્તરસ્થપીઠસ્થોભ્રુકુટી કુટિલાનનઃ ।
ઉચ્ચણ્ડતરકોદણ્ડખણ્ડિતારાતિમણ્ડલઃ ॥ ૨૯॥

જટામણ્ડલગોદ્ભાસિસુધામણ્ડલશેખરઃ ।
વિદ્યુલ્લતેવ ઘનવદ્દંષ્ટ્રાશોભિતવક્ત્રકઃ ॥ ૩૦॥

નીલામલતનૂભાસ્વદ્ભાસિતાલેપસુન્દરઃ ।
સજલોદ્મઘનગગર્ભાન્તરવિદ્યુતા ॥ ૩૧॥

સદૃશામલપુણ્ડ્રાઙ્કુસ્તિલકાકલ્પભૂષિતઃ ।
ધનુર્હેતિધરસ્તાદૃગ્ગણપૈરભિતો વૃતઃ ॥ ૩૨॥

પ્રસન્નકરસઙ્કાશદોર્દણ્ડવરચણ્ડકૈઃ ।
બ્રહ્માણ્ડસ્ફોટનારાવૈઃ કોદણ્ડવરમણ્ડિતૈઃ ॥ ૩૩॥

અઘોરો ઘોરવદનઃ પાતિતાન્દક્ષિણાન્દિશમ્ ।
ચણ્ડાજ્ઞાનતમોચ્ચણ્ડખણ્ડનેમણ્ડિતાલકઃ ॥ ૩૪॥

અઘોરેશં મહાલિઙ્ગં સમ્પૂજ્ય સ્તૌતિ ભક્તિતઃ ॥

- -

અઘોરઃ -

સજ્જન્નિર્જરરાજરાજમકુટીનીરાજનભ્રાજિપ-
દ્રાજીવં જગદાર્તિભઞ્જનરતઞ્જેતારમાજૌ પુરા(૨)મ્ ।
આસામ્રાજ્યમિહૈવ જીવિતનયે સાયુજ્યમેવેજ્યયા
દાતારં ભજ ધૂર્જટિં સ્વહૃદય મે જહ્નુકન્યાભુજઙ્ગમ્ ॥ ૩૫॥

અનિકટગમકપટગિરામહિકટકં નટનલમ્પટં ખપટમ્ ।
અઘપટલપાટનપટું હાટક ગોધારિધારિણં વન્દે ॥ ૩૬॥

- -

સ્કન્દઃ -

(સદ્યોજાત)
પ્રતીચ્યામપિતત્રાસ્તિ પ્રાકારઃ પુષ્પરાગજઃ ।
પુષ્પરાગમણિજ્યોતિર્વિભાસિતદિગન્તરઃ ॥ ૩૭॥

તન્મણીન્દ્રકૃતાનેકરુદ્રક્રીડાદિવિગ્રહૈઃ ।
વૃષભૈસ્તાદૃશૈરેવ ગોપુરાગ્રપ્રકલ્પિતૈઃ ॥ ૩૮॥

ગોપુરૈર્ભૂધરાકારૈઃ રાજત્કલશસુન્દરૈઃ ।
તત્રાસ્તિ ભવનં પુણ્યં નાનામણિવિરાજિતમ્ ॥ ૩૯॥

વેદિકાપટ્ટિકોપેતં સિહ્માસનવરૈર્વૃ(ર્યુ)તમ્ ।
સદ્યોજાતં સુખાસીનં ક્ષારસારવિભૂષિતમ્ ॥ ૪૦॥

પૂર્વજાતનિશાનાથભાસુરાઙ્ગમનોહરમ્ ।
રાજત્પિઙ્ગામલજટાકૃતાપીડનિશાકરમ્ ॥ ૪૧॥

ઉડુનાયકસંશોભિભાલાનલવિલોચનમ્ ।
પ્રચણ્ડતરમાર્તાણ્ડમણ્ડલોત્તમભૂષિતમ્ ॥ ૪૨॥

નીલેન્દીવરસઙ્કાશગ્રીવાયલયસુન્દરમ્ ।
પુષ્પરાગકૃતાનેકમાલાકલિતકન્ધરમ્ ॥ ૪૩॥

વૈયાઘ્રચર્મવિલસત્કટિરત્નસુકાઞ્ચિકમ્ ।
અહિમન્યુવરાનેકતાદૃશૈર્ગણપૈર્યુતમ્ ॥ ૪૪॥

પાશાઙ્કુશાભયકરં પાશિના પરિસેવિતમ્ ।
દધિમણ્ડમહામ્ભોધિમધ્યસૌધવરાશ્રયમ્ ॥ ૪૫॥

ગણૈશ્ચાપિમહોદ્દણ્ડડિમ્ભારાવવિભીષણૈઃ ।
સેવિતં પાશિભિસ્તત્રપશ્ચિમામ્પાતિતાન્દિશમ્ ॥ ૪૬॥

સદ્યોજાતેશ્વરં લિઙ્ગં સ્તૌતિ ભક્ત્યા પ્રપૂજયન્ ॥ ૪૭॥

- -

સદ્યોજાતઃ -
પાટીરદ્રુમકીટકેતનજટાકોટીરભાગેરટ-
ત્સ્પાટોચ્ચૈસ્તટિનીસ્યદાર્ભટતટજ્જૂટીકૃતાહિછટ ।
ઘોટાકૃત્રિમગોકટીતટપટીભૂતેભચર્મામ્બર
ક્ષોણીરુણ્ણિકટાટખાટવિટપિન્મચ્ચિત્તતટ્યામટ ॥ ૪૮॥

વતંસિતસુધાકરં વરગુણૌઘરત્નાકરં
સ્ફુરન્નિટિલલોચનજ્વલનદગ્ધમીનધ્વજમ્ ।
કુલાચલકુમારિકાકુચતટીપટીરાઙ્કિતમ્
ભજામિ ભજતાં સદાભયદમીશ્વરં શઙ્કરમ્ ॥ ૪૯॥

- -

સ્કન્દઃ -
ઇતિ સ્તૌતિ સદા લિઙ્ગં સદ્યોજાતો મહેશ્વરમ્ ।
(વામદેવ)
તદુત્તરેઽપિ પ્રાકારો ગોમેધમણિકલ્પિતઃ ॥ ૫૦॥

ધૃતોદેનાવૃતસ્તત્ર તત્કલ્લોલોત્થવાયુભિઃ ।
પરીવીતો ગોપુરૈશ્ચ તન્મણીન્દ્રકૃતૈશ્શુભૈઃ ॥ ૫૧॥

વરરુદ્રાવતારોદ્યદ્વિગ્રહૈર્વૃષભૈર્યુતમ્ ।
શોભિતં તત્પ્રભાભિશ્ચ તસ્થાનં ચ તસ્ય હિ ॥ ૫૨॥

સૌધૈરપારશિખરૈર્બહુસ્તમ્ભવિરાજિતૈઃ ।
તત્ર સંસ્થં મહાબાહું વામદેવં ત્રિલોચનમ્ ॥ ૫૩॥

સિહ્માસને સુખાસીનં ભસ્મોદ્ધૂલનપાણ્ડરમ્ ।
હરિન્મણિનિભાકારં વિદ્યુન્નિભજટાધરમ્ ॥ ૫૪॥

તિપુણ્ડ્રાઙ્કિતસદ્ભાલં ખઙ્ગખેટધરં શુભમ્ ।
પ્રસન્નાસ્યનીલકણ્ઠં રાજદિન્દુકલાધરમ્ ॥ ૫૫॥

હરિતૈર્ગણપૈશ્ચૈવ વાયુભિઃ પરિસેવિતમ્ ।
ઉદ્યન્મરતકીગર્ભસુન્દરૈર્વાયુવેગિતૈઃ ॥ ૫૬॥

તિપુણ્ડ્રચન્દ્રાર્ધધરૈર્જટામણ્ડલમસ્તકૈઃ ।
બાણબાણાસનધરૈર્હલ્લકાભૂષભૂષિતૈઃ ॥ ૫૭॥

વલ્લકીમુરજોત્તુઙ્ગમૃદઙ્ગવરવાદકૈઃ ।
સેવિતં પરિતો વીરૈશ્શૂલામલલસત્કરૈઃ ॥ ૫૮॥

વામદેવં સામજાતાજિનબદ્ધકટીતટમ્ ।
કણ્ઠે ભુજઙ્ગસંયુક્તં મૃગેન્દ્રામલલોચનમ્ ॥ ૫૯॥

કુબેરેણોત્તરાં પાતિ દિશં યક્ષેશ્વરાવૃતામ્ ।

વામદેવેશ્વરં લિઙ્ગં સમ્પૂજ્યાસ્તુવદીશ્વરમ્ ॥ ૬૦॥

- -

વામદેવઃ -

તિષ્ઠન્તે સ્તુતિપાઠને તવ વિભો નિષ્ઠ્યૂતનિષ્ઠીવવ-

ચ્છાઠ્યં નિષ્ઠુરતાં વિધૂય મનસા બ્રહ્મૈકનિષ્ઠાઃ કતિ ।

વૈકુણ્ઠાર્ચિત રત્નપીઠનિલય શ્રીકણ્ઠ કણ્ઠોલ્લસ-

ન્નીલ જ્યેષ્ઠ કનિષ્ઠ કુષ્ઠહનન શ્રેષ્ઠાન્તરાતિષ્ઠ મે ॥ ૬૧॥

સુરકુવલયસોમં વામદેવાખ્યસામસ્તુતમખિલગુણાનાં સીમધામાનમીશમ્ ।

જગદવનવિનાશં શામ્ભવોધત્સુકામં નિજનયનકટાક્ષૈર્દગ્ધકામં ભજેઽહમ્ ॥ ૬૨॥

- -

સ્કન્દઃ -

એવં સ્તૌતિ મહાદેવં વામદેવઃ પ્રસન્નધીઃ ।

(ઈશાન)

તદન્તરા ગિરેર્મૂર્ધ્નિ સંસ્થો હીરકસૌધકઃ ॥ ૬૩॥

રુદ્રાવતારપ્રભવૈર્વિગ્રહૈર્વૃષભૈરપિ ।

ઉરગેન્દ્રમહાહારો મદ્ધ્યન્દિનરવિપ્રભઃ ॥ ૬૪॥

શર્વરીશાનમકુટીભૂતિભૂષિતવિગ્રહઃ ।

ગજેન્દ્રચર્મવસનો હીરમાલાકૃતાઙ્ગકઃ ॥ ૬૫॥

અન્તરિક્ષૈ રુદ્રગણૈઃ પાતિ વ્યોમ મનોહરમ્ ।

નિષઙ્ગિભિઃ કવચિભિશ્છુરિકાહેતિધારિભિઃ ॥ ૬૬॥

વ્યોમકેશપ્રસાદેન ચેશાનશ્ચોશિતા સતામ્ ।

ઈશાનેશં મહાલિઙ્ગં સમ્પૂજ્ય સ્તૌતિ ભક્તિતઃ ॥ ૬૭॥

- -

ઈશાનઃ -

રથન્તરરવપ્રિયં રથરથાઙ્ગપાણીશરં મનોરથપથાતિગં સુરથનાથસત્કઙ્કણં ।

ભગીરથપથાનુગાવિહિતજહ્નુકન્યાજટં ભજામિ સુરગો રથપ્રિરિયમપારપાપાપહમ્ ॥ ૬૮॥

ચષકે નિજવાજિહેષિતૈશ્ચરણે વાયુસુભોજિશિઞ્જિતૈઃ ।

કટિસીમ્નિ સુભૂરિબૃહ્મિતૈર્મુખરં દૈવતમાવિરસ્તુ ચિત્તે ॥ ૬૯॥

અશ્વીકૃતસ્વીકૃતવેદરાશિનાઙ્ગીકૃતાઙ્ગીકૃતશમ્બરારિઃ ।

અસ્ત્રીકૃતસ્ત્રીકૃતદાનવાર્દિવસ્સદા મે હૃદયે ચકાસ્તુ ॥ ૭૦॥

- -

સ્કન્દઃ -
મહાકૈલાસભવને મણિકલ્પિતમુત્તમમ્ ।
રત્નપ્રાકારમેતદ્ધિપઞ્ચબ્રહ્મપ્રકલ્પિતમ્ ॥ ૭૨॥

મહેશેન તદા વિપ્ર શ્રવણાદઘનાશનમ્ ॥ ૭૩॥

વિચિત્રં શિવનિર્માણં વિચિત્રં શિવચેષ્ટિતમ્ ।
વિચિત્રા શિવમાયા સા મહામાયસ્ય શૂલિનઃ ॥ ૭૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે માહેશ્વરાખ્યે કૈલાસશૈલે પઞ્ચબ્રહ્મપ્રાકારવર્ણનમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । માહેશ્વરાખ્યઃ પ્રથમાંશઃ । અધ્યાયઃ ૧૬ - પઞ્ચબ્રહ્મપ્રાકારવર્ણનમ્ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 16 - pa nchabrahmaprAkAravarNanam ..

Notes:
Skanda સ્કન્દ continues to describe in detail to Jaigīṣavya જૈગીષવ્ય, about the abodes at Mount Kailāsa કૈલાસ શૈલપ્રાકાર of the five aspects of Śiva શિવ - the Panchabrahma પઞ્ચબ્રહ્મ that include Tatpuruṣa તત્પુરુષ in East, Aghora અઘોર in South, Sadyojāta સદ્યોજાત in West, Vāmadeva વામદેવ in North, and Īśāna ઈશાન towards Zenith. He outlines about the worship of the respective Liṅga લિઙ્ગ while describing these five forms/aspects of Śiva શિવ.
Śivarahasyam Aṃśaḥ-1 (Māheśvarākhya) શિવરહસ્યમ્ અંશઃ-૧ (માહેશ્વરાખ્ય) has several descriptions about Mount Kailāsa કૈલાસ શૈલ and Śiva શિવ. Selected verses from some of the chapters are presented here.

Encoded and proofread by Ruma Dewan

---

*Kailasashailaprakaravarnanam 3*

pdf was typeset on January 6, 2024

Please send corrections to *sanskrit@cheerful.com*